# Shri Rajarajeshvari Asatvati

# શ્રીરાજરાજેશ્વરી અસત્વતી સ્તોત્રમ્

## Document Information

Text title : Rajarajeshvari asatvatI stotram

File name : rAjarAjeshvarIasatvatIstotram.itx

Category : devii, dashamahAvidyA

Location : doc_devii

Transliterated by : Malathi Ravi

Proofread by : Malathi Ravi

Latest update : February 21, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીરાજરાજેશ્વરી અસત્વતી સ્તોત્રમ્

ૐ નમો ભવાન્યૈ ।

ૐ છન્દઃપાદયુગા નિરુક્તસુમુખા શિક્ષા ચ જઙ્ઘાયુગા
ઋગ્વેદોરુયુગા યુજઃસુજઘના યા સામવેદોદરા ।
તર્કન્યાયકુચા શ્રુતિસ્મૃતિયુક્ કાવ્યાદિવેદાનના
વેદાન્તામૃતલોચના ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૧॥

ઈશાધીશ્વરયોગિવૃન્દવિધૃતા સ્વાનન્દભૂતા પરા
પશ્યન્તીત્યનુ મધ્યમા વિલસતી શ્રીવૈખરીરૂપિણી ।
આત્માનાત્મવિચારિણી ત્રિનયના વિદ્યાવતી ભારતી
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૨॥

કલ્યાણાયુતપૂર્ણબિમ્બવદના પૂર્ણેશ્વરી નન્દિની
પૂર્ણા પૂર્ણતરા પરેશમહિષી પૂર્ણામૃતાસ્વાદિની ।
સમ્પૂર્ણા પરમોત્તમામૃતકલા વિદ્યાવતી ભારતી
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૩॥

એકાકારમનેકવર્ણવિવિધાકારકચિદ્રૂપિણી
ચૈતન્યાત્મકએકચક્રરચિતા ચક્રાઙ્ગએકાકિની ।
ભાવાભાવવિભાવિની ભયહરા સદ્ભક્તચિન્તામણિઃ
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૪॥

લક્ષ્યાલક્ષ્યનિરીક્ષણા નિરુપમા રુદ્રાક્ષમાલાધરા
સાક્ષાત્કારણદતવંશકલિતા દીર્ઘાતિદીર્ઘેશ્વરી ।
ભદ્રા ભદ્ર વરપ્રદા ભગવતી ભદ્રેશ્વરી ભદ્રદા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૫॥

હ્રિમ્બીજાનલનાદબિન્દુભરિતા સત્કાર (ઓઙ્કાર) નાદાત્મિકા
બ્રહ્માનન્દઘનોદરી ગુણવતી જ્ઞાનેશ્વરી જ્ઞાનદા ।
ઇચ્છાજ્ઞાનક્રિયાવતી જિતવતી ગન્ધર્વસંસેવિતા

શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૬॥

હર્ષોન્મત્તસુવર્ણપાત્રભરિતા પાર્થોન્નતા ઘૂર્ણિતા
હુઙ્કારપ્રિયશબ્દબ્રહ્મ નિરતા સ્વારસ્વતોલ્લાસિની । (હુઙ્કારપ્રિયશબ્દરાશિ)
સારાસારવિચારચારુચરિતા વર્ણાશ્રમાકારિણી
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૭॥

સર્વજ્ઞાનકલાવતી સકરુણા સન્નાદિની નન્દિની
સર્વાન્તર્ગતશાલિની શિવતનૂસન્દીપિણી દીપિની ।
સંયોગપ્રિયરૂપિણી પ્રિયવતી પ્રીતા પ્રતાપોન્નતા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૮॥

કર્માકર્મવિવર્જિતા કુલવતી કર્મપ્રદા કૌલિની
કારુણ્યાવધિ સર્વકર્મનિરતા સિન્ધુપ્રિયા શાલિની ।
પૂર્ણબ્રહ્મસનાતનાન્તરગતા જ્ઞેયા સ્વયોગાત્મિકા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૯॥

હસ્તિકુમ્ભસહક પયોધરવરા પીનોનતા નમ્રગા
હારાદ્યાભરણા સુરેન્દ્ર વિનુતા શ ૃઙ્ગાટપીઠાલયા ।
યોન્યાકારકયોનિમુદ્રિતકરા નિત્યં સુવર્ણાત્મિકા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૦॥

લક્ષ્મીલક્ષણપૂર્ણકુમ્ભવરદા લીલાવિનોદસ્થિતા
લાક્ષારઞ્જિતપદ્મપાદ યુગલા બ્રહ્માણ્ડસંસેવિતા ।
લોકાલોકિતલોકકામજયિની લોકાશ્રયાકાશ્રયા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૧॥

હ્રીઙ્કારાતિશઙ્કરપ્રિયતનુઃ શ્રીયોગપીઠેશ્વરી
માઙ્ગલ્યાયુતપઙ્કજાભનયનામાઇગ્લ્યસિદ્ધિપ્રદા ।
તારુણ્યાત્તપસાર્ચિતા તરુણિકા તન્ત્રોપમાતન્વિતા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૨॥

સર્વેશાઙ્ગવિહારિણી સકરુણા સર્વેશ્વરી સર્વગા
સત્યા સર્વમયી સહસ્ર દલગા સપ્તાર્ણવોપસ્થિતા ।
સઙ્ગાસઙ્ગ વિવર્જિતા સુખકરી બાલાર્કકોટિપ્રભા
શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૩॥

લક્ષ્મીશાદિવિરિ ઞ્ચિચક્રમુકુટાદ્યષ્ટાઙ્ગપીઠાર્ચિતા
    સૂર્યેન્દ્વગ્નિમયૈકપીઠાનલયા ચિન્માત્રકૌલેશ્વરી ।
ગોપ્ત્રી ગુર્વિણિગર્વિતા ગગનગા ગઙ્ગા ગણેશપ્રિયા
    શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૪॥

કાદિક્ષાન્તસુવર્ણબિન્દુસુતનુઃ સ્વર્ણાદિસિંહાસના
    નાનારત્નવિચિત્રચિત્રરચિતા ચાતુર્યચિન્તામણિઃ ।
ચિત્તાનન્દવિધાયિની સુવિપુલા કોટિત્રયીશ્યમ્બિકા
    શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૫॥

હ્રીકારત્રયરૂપિણી સમયિની સંસારિણી હંસિની
    વામાચારપરાયણા સુ-મુકુટા બીજાવતી મુદ્રિણી ।
કામાક્ષી કરુણાવિચિત્રરચિતા શ્રી શ્રી ત્રિમૂર્ત્યાત્મિકા
    શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૬॥

સાબિમ્બપ્રતિબિમ્બલમ્બિત સલત્ બિમ્બાધરા યામ્બિકા
    જમ્બીરોત્પલકર્ણશોભતમુખા જમ્બૂફલ શ્રીકુચા ।
નાનારત્નકિરીટદીપ્તિલસિતા પ્રત્યક્ષદીક્ષાત્મિકા
    શ્રીચક્રપ્રિયબિન્દુતર્પણપરા શ્રીરાજરાજેશ્વરી ॥ ૧૭॥

યત્તેજો નિધિમિસ્ત્વનન્ત ધૃણિભિર્નોપાદ્યતે પ્રેરિતુ
    હાદ ધ્વાન્તમપાસ્ય સિક્ષણપિ તદ્ધ્યાન માત્રા દૃશા ।
યત્સદ્ભાદનુભાતિ સર્વમુદિતં ભાનું યથા પદ્મિની
    પ્રત્યગ્દામ નમામ તત્તવ વપુઃ શ્રીરાજરાજેશ્વરી ॥ ૧૮॥

॥ ઇતિ શ્રીરાજરાજેશ્વરી અસત્વતી સ્તોત્રં સમાપ્તમ્ ॥

This is similar to rAjarAjeshvarImantramAtRikAstavaH,
same refrain in the fourth line, however without
the common anusvAras throughout. The text is
different in many places. It was published by
Shri Chakrishvara Mandali, Shrinagar

Encoded and proofread by Malathi Ravi

*Shri Rajarajeshvari Asatvati*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*